अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा
स्नातककार्यक्रमः - साहित्यम्
2025

ज्ञान-विज्ञान विमुक्तये
UGC

विश्वविद्यालय-अनुदान-आयोगः
बहादुरशाह-जफर-मार्गः
नवदेहली – 110002

UGC LOCF Committee (Sanskrit)

Prof. Shrinivasa Varakhedi
Chairperson of the committee and Vice-Chancellor, Central Sanskrit University, New Delhi – 110058, ✉ vc@sanskrit.nic.in
Prof. Sukant Kumar Senapati
Vice-Chancellor, Shri Somnath Sanskrit University, Veraval, ✉ sukantsnpt@gmail.com
Prof. Viroopaksha V. Jaddipal
Secretary, Maharishi Sandipani Rashtriya Ved Vidya Pratishthan, Ujjain,
✉ vvjaddipal@gmail.com
Dr. M. V. Natesan
(Retd Prof.) SSV Kaladi, Kailash Nagar Kolazhy, Biyur, Trichur-10,
✉ natesanskt2000@gmail.com
Dr. Mamta Tripathi
Assistant Professor, Gargi College, University of Delhi, Delhi,
✉ mamtatripathi.jnu@gmail.com

Curriculum Development & Co-ordination Committee for B.A. Hons. (Sahityam)

Prof. Ramakant Pandey
Chair Person of the Committee and Director, Bhopal Campus, Central Sanskrit University, Bhopal, Madhya Pradesh - 462043
✉ ramakantpandey2010@gmail.com
Prof. G. Sankaranarayanan
Convenor of the Committee and Professor, Dept. of Sahitya, National Sanskrit University, Tirupati, Andhra Pradesh – 517507, ✉ sankarankanchi@nsktu.org
Dr. Anil Kumar
Asso. Prof. (Sahitya) Central Sanskrit University, Raghunath Kirti Campus.
✉ anillbs.kumar@gmail.com
Dr. G. Surya Prasad
Chief Co-ordinator of the Co-ordination committee and Asst. Professor, Central Sanskrit University, New Delhi – 110058, ✉ dr.gsurya.prasad@csu.co.in
Dr. Yashvant Kumar Trivedi
Asst. Professor, Central Sanskrit University, New Delhi – 110058,
✉ dr.yashvant.trivedi@csu.co.in
Dr. Awasthi Sailesh Kumar
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058,
✉ dr.awasthisailesh@csu.co.in
Dr. Kishor Kumar
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058,
✉ dr.kishor_kumar@csu.co.in
Dr. Deepika Dixit
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058,
✉ dr.deepikadixit@csu.co.in

विषयसूची

कार्यक्रमस्य परिचयः

(Introduction of the Program)

बी.ए. आनर्स् (साहित्यम्) चतुर्णां वर्षाणां कार्यक्रमः विद्यते। अस्मिन् कार्यक्रमे आहत्य अष्टसत्रार्धाः भविष्यन्ति।

अर्हता - प्राक्-शास्त्री-उपशास्त्री-उत्तरमध्यमा इति परीक्षायाम् उत्तीर्णाः तत्समकक्ष्यापरीक्षोत्तीर्णाः वा छात्राः एन्.टि.ए. द्वारा आयोज्यमानपरीक्षामाध्यमेन उत्तीर्य अस्मिन् बी.ए.आनर्स (साहित्यम्) कार्यक्रमे प्रवेष्टुं शक्नुवन्ति। अत्र अष्टसु सत्रार्धेषु स्वशास्त्रीयपाठ्यक्रमाः **(Major),** स्वशास्त्रसम्बद्धचयनितपाठ्यक्रमाः **(Minor),** बहुशास्त्रीयपाठ्यक्रमाः **(Multi-Disciplinary),** मूल्यवर्धनपाठ्यक्रमाः **(VAC),** कौशलवर्धनपाठ्यक्रमाः **(SEC)** च भविष्यन्ति।

एतैः साकं अन्तिमसत्रार्धे प्रशिक्षुतासेवा **(Internship)** पाठ्येतरगतिविधयः**(ECA)** लघुशोधप्रबन्धः (**Dissertation**) च भविष्यन्ति।

कार्यक्रमस्य उद्देश्यानि

(Objectives of the Program)

1. भारतीयज्ञानपरम्पाराधारेण संस्कृतकाव्यानां परिचयप्रदानम्।
2. भारतीयसंस्कृतेः विषये ज्ञानप्रदानम्।
3. भारतीयनाट्यपरम्परायाः परिचयप्रदानम्।
4. नैतिकमूल्यानां विषये ज्ञानप्रदानम्।
5. भारतीयजीवनपद्धतेः कुटुम्बव्यवस्थायाश्च विषये मार्गदर्शनम्।
6. नाटकरचना-पद्यरचना-साहित्यरचनादिकौशलविकासाय मार्गदर्शनम्।
7. संस्कृत-आङ्ग्ल-हिन्दीभाषासु सम्भाषणकौशलसम्पादनम्।
8. भारतीयज्ञानपरम्पराविषयेषु शोधदृष्टिप्रदानम्।
9. सङ्गणकद्वारा संस्कृतसम्बद्धं/शास्त्रसम्बद्धं विधिलेखनं (Programming) निर्मातुं दक्षताप्रदानम्।

कार्यक्रमस्य परिणामाः

(Outcomes of the Program)

कार्यक्रमस्य परिणामः – 1	**भारतीयमूलानि -** संस्कृतसाहित्यकाव्यनाट्यादिकलासु कुशलानां छात्राणां निर्माणम्।
कार्यक्रमस्य परिणामः – 2	**भारतीयज्ञानपरम्परा** – भारतीयज्ञानपरम्परायै साहित्यशास्त्रयोगदानस्य अवबोधः।
कार्यक्रमस्य परिणामः – 3	**भविष्यवाद्युपागमः -** संस्कृतसाहित्यरचनायां निपुणत्त्वेन छात्राणां निर्माणम्। काव्यशास्त्रीयसिद्धान्तानां व्यावहारिकानुप्रयोगे कुशलानां छात्राणां निर्माणम्। छात्राणां नैतिकतासंवर्धनम्।
कार्यक्रमस्य परिणामः – 4	**बहुशास्त्रीयम् -** काव्येषु प्रतिपादितान् लोकोपयोगिनः मौलिकान् विषयान् समाजे सप्रमाणं प्रतिपादयितुं समर्थानां छात्राणां निर्माणम्।
कार्यक्रमस्य परिणामः – 5	**वृत्तिप्रदानक्षमता -** छात्रान् व्यावसायिक-विश्लेषणात्मकप्रौद्योगिकी-कौशलेन सुसज्जितान् कृत्वा तेषां वृत्तिसामर्थ्यस्य वर्धनम्।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्
PROGRAM OUTCOME MAPPING FOR MAJOR COURSES

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level काठिन्य स्तरः
साहित्यशास्त्रस्य परिचयः	✓	✓	✓	✓	✓	✓	✓
शिशुपालवधमहाकाव्ये वर्णिता राजनीतिः	✓	✓	✓	✓	✓	✓	✓
संस्कृतभाषायाः व्याकरणस्य च परिचयः	✓	✓	✓	✓	✓	✓	✓
संस्कृतसाहित्येतिहासस्य परिचयः	✓	✓	✓	✓	✓	✓	✓
भारतीयशास्त्रीयकलानां मूलाधाराः	✓	✓	✓	✓	✓	✓	✓
शतककाव्येषु नीतिशतकम्	✓	✓	✓	✓	✓	✓	✓
मेघदूतवर्णितानि भौगोलिकक्षेत्राणि	✓	✓	✓	✓	✓	✓	✓
प्रमुखाणि छन्दांसि कविशिक्षा च	✓	✓	✓	✓	✓	✓	✓
संस्कृतगद्यसाहित्यस्य परिचयः	✓	✓	✓	✓	✓	✓	✓
अलङ्कारशास्त्रस्य परिचयः	✓	✓	✓	✓	✓	✓	✓
काव्यलक्षणानुबन्धप्रयोजनानि	✓	✓	✓	✓	✓	✓	✓
शुकनासोपदेशः -	✓	✓	✓	✓	✓	✓	✓

राजनैतिकतत्त्वानि							
संस्कृतनाटकानि : चितनाटकानाम् अध्ययनम्	✓	✓	✓	✓	✓	✓	✓
विशिष्टालङ्काराणाम् अध्ययनम्	✓	✓	✓	✓	✓	✓	✓
प्राच्यपाश्चात्त्यसाहित्यस्य तुलनात्मकमध्ययनम्	✓	✓	✓	✓	✓	✓	✓
ध्वनिसिद्धान्तः - आनन्दवर्धनः अभिनवगुप्तः	✓	✓	✓	✓	✓	✓	✓
रससिद्धान्तः	✓	✓	✓	✓	✓	✓	✓
अलङ्कारशास्त्रस्य सामाजिकमहत्त्वम्	✓	✓	✓	✓	✓	✓	✓
पौराणिकसाहित्यस्य विशिष्टाध्ययनम्	✓	✓	✓	✓	✓	✓	✓
भारतीयपुरालिपि-शास्त्रम्	✓	✓	✓	✓	✓	✓	✓
भारतीयकाव्यशास्त्रे रसो नायकश्च	✓	✓	✓	✓	✓	✓	✓
नलदमयन्त्योः चरितम्	✓	✓	✓	✓	✓	✓	✓
यौवनसमयोचितः उपदेशः (शुकनासोपदेशानुसारेण)	✓	✓	✓	✓	✓	✓	✓
रामस्य राजधर्मनिर्वहणम् (रघुवंशस्य त्रयोदश-चतुर्दशसर्गौ)	✓	✓	✓	✓	✓	✓	✓
किरातार्जुनीयमहाकाव्ये राजनैतिकाः विचाराः (प्रथमसर्गः)	✓	✓	✓	✓	✓	✓	✓

संस्कृते अनूदितं साहित्यम् अनुवादश्च	✓	✓	✓	✓	✓	✓	✓
नारी-आदर्शसम्बद्धसाहित्यम्	✓	✓	✓	✓	✓	✓	✓
राष्ट्रनिर्माणकौशलसम्बद्धं साहित्यम्	✓	✓	✓	✓	✓	✓	✓
हिमालयस्य महत्त्वम्, उमायाः तपस्यायाश्च महत्त्वं (कुमारसम्भवम् - प्रथम-पञ्चमसर्गौ)	✓	✓	✓	✓	✓	✓	✓
अलङ्कारशास्त्राणां विशिष्टाध्ययनम्	✓	✓	✓	✓	✓	✓	✓
नाट्यसङ्ग्रहस्य परिचयः	✓	✓	✓	✓	✓	✓	✓
रीतिसम्प्रदायः वामनश्च	✓	✓	✓	✓	✓	✓	✓
बुद्धस्य चरितम्	✓	✓	✓	✓	✓	✓	✓
राष्ट्रस्य एकतायां चाणक्यस्य अवदानम्	✓	✓	✓	✓	✓	✓	✓
साहित्यसम्प्रदाये काव्यात्मतत्त्वविश्लेषणम्	✓	✓	✓	✓	✓	✓	✓
रुय्यकसम्मताः अलङ्काराः	✓	✓	✓	✓	✓	✓	✓
अभिधावृत्तिविमर्शः	✓	✓	✓	✓	✓	✓	✓
गोविन्दस्य माहात्म्यम्	✓	✓	✓	✓	✓	✓	✓
राष्ट्रियशिक्षानीतौ संस्कृतम्	✓	✓	✓	✓	✓	✓	✓
व्यञ्जनावृत्तेः विश्लेषणं विशिष्टाध्ययनञ्च	✓	✓	✓	✓	✓	✓	✓

गौणानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

PROGRAM OUTCOME MAPPING FOR MINOR COURSES

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीय पाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level कठिनतायाः स्तरः
रघोः पराक्रमः कौत्सस्य गुरुदक्षिणा च	✓	✓	✓	✓	✓	✓	✓
आलङ्कारिकाणां तेषां सिद्धान्तानां च परिचयः	✓	✓	✓	✓	✓	✓	✓
अलङ्काराः (जयदेवमतानुसारेण)	✓	✓	✓	✓	✓	✓	✓
शकुन्तलायाः पतिगृहं प्रति प्रस्थानम्	✓	✓	✓	✓	✓	✓	✓
नाटिकापरम्परा रत्नावली च	✓	✓	✓	✓	✓	✓	✓
ऐतिहासिकगद्यसाहित्यं - हर्षवर्धनस्य हूणविजययात्रा	✓	✓	✓	✓	✓	✓	✓
काव्यशास्त्रे निरूपिताः पदार्थाः	✓	✓	✓	✓	✓	✓	✓
अनूदितसाहित्ये लावण्यमयी	✓	✓	✓	✓	✓	✓	✓
साहित्यस्य साहित्यशास्त्रस्य च व्यावहारिकप्रयोगः	✓	✓	✓	✓	✓	✓	✓
कुन्तकसम्मता वक्रोक्तिः	✓	✓	✓	✓	✓	✓	✓
भवभूतेः कारुण्यचमत्कृतिः	✓	✓	✓	✓	✓	✓	✓
संस्कृतवाङ्मये राष्ट्रभक्तिः (शिवराजविजयं प्रतापविजयञ्च)	✓	✓	✓	✓	✓	✓	✓
भाषा-विज्ञानम्	✓	✓	✓	✓	✓	✓	✓
कथाकाव्यम् (कादम्बरी-पूर्वार्धम्)	✓	✓	✓	✓	✓	✓	✓

साहित्यस्नातकस्य गुणाः

(GRADUATE ATTRIBUTES IN SANSKRIT)

❖ साहित्यपाठ्यचर्यायाः विशिष्टगुणाः

- भारतीयज्ञानपरम्परायाः संरक्षणम्।
- काव्यकौशलस्य काव्यशास्त्रकौशलस्य च विकासः।
- भारतीयनाट्यकलायाः विकासः।
- युगानुकूलतया समन्वयसम्पादनपूर्वकं भारतस्य समग्रविकासे सहयोगः।
- संस्कृतस्य संस्कृतेश्च सम्पूर्णविश्वे प्रचारः प्रसारश्च।
- प्राचीनविषयाणाम् आधुनिकविषयैः सह समन्वयः।
- सरलमानकसंस्कृतस्य परिपालनम्।
- विकसितभारतस्य@**2047** निर्माणाय संस्कृतमाध्यमेन सहयोगप्रदानम्।
- सभ्यसमाजस्य निर्माणम्।
- राष्ट्रं प्रति स्वकर्त्तव्यस्य निर्वाहः।

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमवर्षः प्रधानपाठ्यक्रमाः	प्रधानः 1.1: साहित्यशास्त्रस्य परिचयः	4	100-199
2		प्रधानः 1.2: शिशुपालवधमहाकाव्ये वर्णिता राजनीतिः	4	100-199
3		प्रधानः 1.3: संस्कृतभाषायाः व्याकरणस्य च परिचयः	4	100-199
4		प्रधानः 1.4: संस्कृतसाहित्येतिहासस्य परिचयः	4	100-199
5		प्रधानः 1.5: भारतीयशास्त्रीयकलानां मूलाधाराः	4	100-199
6		प्रधानः 1.6: शतककाव्येषु नीतिशतकम्	4	100-199
7		प्रधानः 1.7: मेघदूतवर्णितानि भौगोलिकक्षेत्राणि	4	100-199
8		प्रधानः 1.8: प्रमुखाणि छन्दांसि कविशिक्षा च	4	100-199
9		प्रधानः 1.9: संस्कृतगद्यसाहित्यस्य परिचयः	4	100-199
10		प्रधानः 1.10: अलङ्कारशास्त्रस्य परिचयः	4	100-199
11	द्वितीयवर्षः प्रधानपाठ्यक्रमाः	प्रधानः 2.1: काव्यलक्षणानुबन्धप्रयोजनानि	4	200-299
12		प्रधानः 2.2: शुकनासोपदेशः - राजनैतिकतत्त्वानि	4	200-299
13		प्रधानः 2.3: संस्कृतनाटकानि : चितनाटकानाम् अध्ययनम्	4	200-299
14		प्रधानः 2.4: विशिष्टालङ्काराणाम् अध्ययनम्	4	200-299
15		प्रधानः 2.5: प्राच्यपाश्चात्त्यसाहित्यस्य तुलनात्मकमध्ययनम्	4	200-299
16		प्रधानः 2.6: ध्वनिसिद्धान्तः - आनन्दवर्धनः अभिनवगुप्तः	4	200-299
17		प्रधानः 2.7: रससिद्धान्तः	4	200-299
18		प्रधानः 2.8: अलङ्कारशास्त्रस्य सामाजिकमहत्त्वम्	4	200-299
19		प्रधानः 2.9: पौराणिकसाहित्यस्य विशिष्टाध्ययनम्	4	200-299
20		प्रधानः 2.10: भारतीयपुरालिपि-शास्त्रम्।	4	200-299
21	तृतीयवर्षः प्रधानपाठ्यक्रमाः	प्रधानः 3.1: भारतीयकाव्यशास्त्रे रसो नायकश्च	4	300-399
22		प्रधानः 3.2: नलदमयन्त्योः चरितम्	4	300-399
23		प्रधानः 3.3: यौवनसमयोचितः उपदेशः (शुकनासोपदेशानुसारेण)	4	300-399
24		प्रधानः 3.4: रामस्य राजधर्मनिर्वहणम् (रघुवंशस्य त्रयोदश-चतुर्दशसर्गौ)	4	300-399
25		प्रधानः 3.5: किरातार्जुनीयमहाकाव्ये राजनैतिकाः विचाराः (प्रथमसर्गः)	4	300-399
26		प्रधानः 3.6: संस्कृते अनूदितं साहित्यम् अनुवादश्च	4	300-399
27		प्रधानः 3.7: नारी-आदर्शसम्बद्धसाहित्यम्	4	300-399
28		प्रधानः 3.8: राष्ट्रनिर्माणकौशलसम्बद्धं साहित्यम्	4	300-399
29		प्रधानः 3.9: हिमालयस्य महत्त्वम्, उमायाः तपस्यायाश्च महत्त्वं (कुमारसम्भवम् - प्रथम-पञ्चमसर्गौ)	4	300-399

30		प्रधानः 3.10: अलङ्कारशास्त्राणां विशिष्टाध्ययनम्	4	300-399
31	चतुर्थवर्षः प्रधानपाठ्यक्रमाः	प्रधानः 4.1: नाट्यसङ्ग्रहस्य परिचयः	4	400-499
32		प्रधानः 4.2: रीतिसम्प्रदायः वामनश्च	4	400-499
33		प्रधानः 4.3:बुद्धस्य चरितम्	4	400-499
34		प्रधानः 4.4: राष्ट्रस्य एकतायां चाणक्यस्य अवदानम्	4	400-499
35		प्रधानः 4.5: साहित्यसम्प्रदाये काव्यात्मतत्त्वविश्लेषणम्।	4	400-499
36		प्रधानः 4.6: रुय्यकसम्मताः अलङ्काराः	4	400-499
37		प्रधानः 4.7: अभिधावृत्तिविमर्शः	4	400-499
38		प्रधानः 4.8: गोविन्दस्य माहात्म्यम्	4	400-499
39		प्रधानः 4.9: राष्ट्रियशिक्षानीतौ संस्कृतम्	4	400-499
40		प्रधानः 4.10: व्यञ्जनावृत्तेः विश्लेषणं विशिष्टाध्ययनञ्च।	4	400-499

गौणपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमवर्षः गौणपाठ्यकमाः	गौणः 1.क.1: रघोः पराक्रमः कौत्सस्य गुरुदक्षिणा च	4	100-199
2		गौणः 1.क.2: आलङ्कारिकाणां तेषां सिद्धान्तानां च परिचयः	4	100-199
3		गौणः 1.क.3: अलङ्काराः (जयदेवमतानुसारेण)	4	100-199
4	द्वितीयवर्षः गौणपाठ्यकमाः	गौणः 2.क.1: शकुन्तलायाः पतिगृहं प्रति प्रस्थानम्	4	200-299
5		गौणः 2.क.2: नाटिकापरम्परा रत्नावली च	4	200-299
6		गौणः 2.क.3: ऐतिहासिकगद्यसाहित्यं - हर्षवर्धनस्य हूणविजययात्रा	4	200-299
7	तृतीयवर्षः गौणपाठ्यक्रमाः	गौणः 3.क.1: काव्यशास्त्रे निरूपिताः पदार्थाः	4	300-399
8		गौणः 3.क.2: अनूदितसाहित्ये लावण्यमयी	4	300-399
9		गौणः 3.क.3: साहित्यस्य साहित्यशास्त्रस्य च व्यावहारिकप्रयोगः	4	300-399
10	चतुर्थवर्षः गौणपाठ्यक्रमाः	गौणः 4.क.1: कुन्तकसम्मता वक्रोक्तिः	4	400-499
11		गौणः 4.क.2: भवभूतेः कारुण्यचमत्कृतिः	4	400-499
12		गौणः 4.क.3: संस्कृतवाङ्मये राष्ट्रभक्तिः (शिवराजविजयं प्रतापविजयञ्च)	4	400-499
13		गौणः 4.क.4: भाषा-विज्ञानम्	4	400-499
14		गौणः 4.क.5: कथाकाव्यम् (कादम्बरी-पूर्वार्धम्)	4	400-499

प्रथमवर्षः

(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रथमसत्रार्द्धः (Semester - 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: साहित्यशास्त्रस्य परिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयसाहित्यशास्त्रस्य सामान्यपरिचयप्रदानम्।
2. काव्यशास्त्रस्य अध्ययनेन प्राप्यमाणानां प्रयोजनानां ज्ञानसम्पादनम्।
3. काव्येषु प्रयुक्तानां गुण-रीति-अलङ्कारादितत्त्वानां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. साहित्यशास्त्रस्य विविधग्रन्थानां सामान्यपरिचयं प्रदास्यन्ति।
2. विविधकाव्यानां परिचयं प्रदास्यन्ति।
3. काव्यगुणानां साहित्यशास्त्रीयग्रन्थानां परिचयं प्रतिपादयितुं समर्थाः भविष्यन्ति।
4. काव्यगुणानां स्वरूपस्य भेदानां च विश्लेषणं करिष्यन्ति।
5. अलङ्काराणां स्वरूपस्य भेदानां च विश्लेषणं करिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	साहित्यशास्त्रस्य परिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. साहित्यशास्त्रस्य नामकरणं तद्ग्रन्थाश्च। **श्रेयोऽङ्कः १**

- साहित्यशब्दार्थपरिचयः।
- साहित्यशास्त्रस्य परिचयः।
- साहित्यशास्त्रीयाः ग्रन्थाः - (नाट्यशास्त्रं, काव्यादर्शः, भामहकृतः काव्यालङ्कारः, काव्यालङ्कारसूत्रवृत्तिः, ध्वन्यालोकः, औचित्यविचारचर्चा, वक्रोक्तिजीवितं, व्यक्तिविवेकः, काव्यप्रकाशः, साहित्यदर्पणः, रसगङ्गाधरः, काव्यालङ्कारकारिका, अभिराजयशोभूषणम्, अभिनवकाव्यालङ्कारसूत्रं, काव्यतत्त्वसमन्वितिः)

अन्वितिः २. काव्यस्य प्रयोजन-कारण-लक्षण-भेदाः। **श्रेयोऽङ्कः १**

- काव्यप्रयोजनम्।
- काव्यकारणम्।
- काव्यलक्षणम्।

- काव्यभेदाः।

अन्वितिः ३. गुणपरिचयः। **श्रेयोऽङ्कः १**

- गुणस्वरूपम्।
- गुणभेदाः -
    - ➢ त्रयो गुणाः।
    - ➢ अष्टौ गुणाः।
    - ➢ दशगुणाः।
    - ➢ विंशतिः गुणाः।

अन्वितिः ४. अलङ्कारपरिचयः। **श्रेयोऽङ्कः १**

- अलङ्कारस्वरूपम्।
- अलङ्कारभेदाः -
    - ➢ शब्दालङ्काराः।
    - ➢ अर्थालङ्काराः।
    - ➢ उभयालङ्काराः।
- गुणालङ्कारयोः भेदः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. मम्मटः। (2005)। *काव्यप्रकाशः* (वामनझलकीकरप्रणीतटीकासहितः)। नई दिल्ली : परिमल प्रकाशन।
2. विश्वनाथः। (2008)। *साहित्यदर्पणः* (आचार्यलोकमणिदहालः)। वाराणसी : चौखम्बा सुरभारती प्रकाशनम्।
3. वामनः। (2001)। *काव्यालंकारसूत्राणि* (श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितटीकासहितः)। वाराणसी : चौखम्बा संस्कृत सुरभारती प्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. डे, डा. सुशीलकुमार, & शर्मा, श्रीमायाराम, (1988), *संस्कृतकाव्यशास्त्र का इतिहास*, पटना : बिहार हिन्दी ग्रन्थ अकादमी।
2. हीरा, डॉ. राजवंश सहाय, (1988), *भारतीय साहित्यशास्त्रकोश*, पटना : बिहार हिन्दी ग्रन्थ अकादमी।
3. पाणिग्राही, डॉ. शत्रुघ्न, (2001), *शास्त्रपरिचायिका*, वेरावल : श्री सोमनाथ संस्कृत विश्वविद्यालय।
4. मिश्रः, डॉ. जयमन्त, (2005), *काव्यात्ममीमांसा*, वाराणसी : चौखम्बा विद्या भारती।
5. उपाध्याय, बलदेव, *संस्कृतवाङ्मय का बृहद् इतिहास* (काव्यशास्त्रखण्डः), लखनऊ : उत्तर प्रदेश संस्कृत संस्थान।

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: संस्कृतभाषायाः व्याकरणस्य च परिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. संस्कृतभाषायाः सामान्यपरिचयप्रदानम्।
2. व्याकरणस्य अध्ययनेन प्राप्यमाणानां प्रयोजनानां ज्ञानसम्पादनम्।
3. व्याकरणगत सन्धि-समास-कारकादीनां परिचयप्रदानम्।
4. संस्कृतवाक्यरचनाकौशलज्ञानप्राप्तिः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. संस्कृतभाषायाः वर्णनं करिष्यन्ति।
2. संस्कृतभाषावैशिष्ट्यस्य वैज्ञानिकतायाः च परिचयस्य प्रदाने समर्थाः भविष्यन्ति।
3. विविधलिपीनां परिचयात्मकवर्णनं करिष्यन्ति।
4. सन्धेः समासस्य च स्वरूपं भेदान् च वर्णयितुं समर्थाः भविष्यन्ति।
5. कारकस्य स्वरूपं भेदान् च वर्णयितुं समर्थाः भविष्यन्ति।
6. संस्कृतवाक्यरचनाप्रयोगं करिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	संस्कृतभाषायाः व्याकरणस्य च परिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. विविधलिपीनां परिचयः। **श्रेयोऽङ्कः १**

- शारदालिपिः।
- ब्राह्मीलिपिः।
- खरोष्ठीलिपिः।

अन्वितिः २. व्याकरणम्। **श्रेयोऽङ्कः १**

- पञ्चसन्धीनां परिचयः।
- समासस्य परिचयः।

- कारकस्य परिचयः।

अन्वितिः ३. संस्कृतवाक्यरचना। **श्रेयोऽङ्कः १**

- संस्कृतवाक्यरचनायाः परिचयः।
- वाक्येषु प्रत्ययस्य प्रयोगः।
- वाक्येषु अव्ययानि।
- एकार्थीभावः।
- पर्यायपदानि समानध्वनिश्च (Homonyms or homophones)
- वाक्येषु विशेषणविशेष्यभावः।

अन्वितिः ४. अभ्यासः स्वरविज्ञानञ्च। **श्रेयोऽङ्कः १**

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. गौरीशंकर, हीराचंद, ओझावर्यविरचित, *भारतीयप्राचीनलिपिः*।
2. पद्मकरमिश्रवर्यविरचित, *सिन्धुलिपिः, अन्यभारतीयलिपयश्च*।
3. वैयाकरणसिद्धान्तकौमुदी, नवदेहली : चौखम्भा सुरभारती प्रकाशनम्।
4. कपिलदेव द्विवेदी, *प्रौढरचनानुवादकौमुदी*, वाराणसी : विश्वविद्यालय प्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. *कारकम्*, बेङ्गळूरु : अक्षरं, संस्कृतभारती।
2. *सन्धिः*, बेङ्गळूरु : अक्षरं, संस्कृतभारती।
3. *समासः*, बेङ्गळूरु : अक्षरं, संस्कृतभारती।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: संस्कृतसाहित्येतिहासस्य परिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयसाहित्यशास्त्रस्य सामान्यपरिचयप्रदानम्।
2. साहित्यशास्त्रस्य प्राप्यमाणानां प्रयोजनानां ज्ञानसम्पादनम्।
3. प्राचीनग्रन्थानां काव्यनाटकादीनाञ्च परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. विविधकाव्यानां परिचयं वर्णयिष्यन्ति।
2. काव्यगुणानां साहित्यशास्त्रीयग्रन्थानां परिचयं प्रतिपादयितुं समर्थाः भविष्यन्ति।
3. काव्यगुणानां स्वरूपं भेदान् च वक्ष्यन्ति।
4. गद्य-कथासाहित्य-चम्पूकाव्यानि विभेत्तुं समर्थाः भविष्यन्ति।
5. गीति-खण्डकाव्यादिविषयान् विश्लेषयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	संस्कृतसाहित्येतिहासस्य परिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. **श्रेयोऽङ्कः १**

- वैदिकवाङ्मयस्य परिचयः।
- रामायणस्य परिचयः।
- महाभारतस्य परिचयः।
- पुराणानां परिचयः (परिभाषा सङ्ख्या च)

अन्वितिः २. **श्रेयोऽङ्कः १**

- महाकाव्यानां परिचयः - अश्वघोष-कालिदास-भारवि-माघ-श्रीहर्षादीनां विशेषसन्दर्भे।
- संस्कृतनाटकानां परिचयः - भास-कालिदास-शूद्रक-विशाखदत्त-अश्वघोष-भट्टनारायणादीनां विशेषसन्दर्भे।

अन्वितिः ३. **श्रेयोऽङ्कः १**

- गीतिकाव्यानां परिचयः (कालिदासः जयदेवश्च)

- खण्डकाव्यानां परिचयः (कालिदासः भर्तृहरिः च)

अन्वितिः ४. **श्रेयोऽङ्कः १**

- चम्पूकाव्यानां परिचयः (रामायणचम्पू, भारतचम्पू, नलचम्पू, नीलकण्ठचम्पू च)
- गद्यकाव्यानां परिचयः (सुबन्धुः, बाणभट्टः, दण्डी च)
- कथासाहित्यस्य परिचयः (गुणाढ्यः, सोमदेवः, विष्णुशर्मा, पंडितनारायणश्च)

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. द्विवेदी, कपिलदेव, *संस्कृत साहित्य का समीक्षात्मक इतिहास*।
2. उपाध्याय, बलदेव, *संस्कृत वाङ्मय का बृहद् इतिहास*।
3. शर्मा, उमाशंकर, *संस्कृत साहित्य का इतिहास*।

सहायकाः ग्रन्थाः (Additional Readings)

1. डा. सुशीलकुमार डे, श्रीमायाराम शर्मा, (1988), *संस्कृतकाव्यशास्त्र का इतिहास*, बिहार हिन्दी ग्रन्थ अकादमी, पटना।
2. डा. राजवंश सहाय हीरा, (1988), *भारतीय साहित्यशास्त्रकोश*, बिहार हिन्दी ग्रन्थ अकादमी, पटना।
3. बलदेव उपाध्यायः, *संस्कृतवाङ्मय का बृहद् इतिहास (काव्यशास्त्रखण्डः)*, उत्तरप्रदेश संस्कृत संस्थान, लखनऊ।
4. डा. जयमन्त मिश्रः, (2005), *काव्यात्ममीमांसा*, चौखम्बा विद्या भारती, वाराणसी।

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.4: भारतीयशास्त्रीयकलानां मूलाधाराः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयशास्त्रीयकलानां सामान्यपरिचयप्रदानम्।
2. शास्त्रीयकलाभिः प्राप्यमाणानां प्रयोजनानां ज्ञानसम्पादनम्।
3. प्राचीनकलानां नृत्य-सङ्गीत-वाद्यादीनां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. विविधकलानां परिचयं वर्णयिष्यन्ति।
2. विविधकलासु विद्यमानवैशिष्ट्यस्य गुणानाञ्च प्रतिपादने समर्थाः भविष्यन्ति।
3. प्राचीनकलानां स्वरूपं भेदान् च लेखिष्यन्ति।
4. गीत-नृत्य-वाद्यकलाः अभिज्ञातुं समर्थाः भविष्यन्ति।
5. प्रमुखप्रसिद्धगीतकाराणां विषये वर्णयिष्यन्ति।
6. भारतीयशास्त्रीयकलानां दर्शनं सिद्धान्तञ्च प्रतिपादयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	भारतीयशास्त्रीयकलानां मूलाधाराः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. भारतीयशास्त्रीयकलानां परिचयः। **श्रेयोऽङ्कः १**

- भारतीयशास्त्रीयकलानां विहङ्गावलोकनम् (Overview)
- भारतीयशास्त्रीयकलानां प्रकाराः।
- प्रमुखकलारूपाणां परिचयः।
  - संगीतम् (कर्णाटकं हिन्दुस्तानी च)
  - नृत्यम् (भरतनाट्यम्, कुचिपुडी, कथक, मणिपुरी, कथाकाली, ओडिस्सी आदयः)
  - दृश्यकला (मधुबनी, वरली, आदयः)

अन्वितिः २. भारतीयशास्त्रीयसंगीतम्। **श्रेयोऽङ्कः १**

- भारतीयशास्त्रीयसंगीतस्य मूलानि।
- हिन्दुस्तानी शास्त्रीयसंगीतस्य परिचयः - रागः तालः वाद्ययन्त्राणि (सितार, तबला, सरोद इत्यादयः) च।

- कर्नाटकशास्त्रीयसङ्गीतस्य परिचयः - रागः तालः वाद्ययन्त्राणि (वीणा, मृदङ्गम्, वेणुः इत्यादयः) च।
- मुख्यसङ्गीतकाराणां परिचयः हिन्दुस्तानीपरम्परायां तानसेनः, एम्.एस्.सुब्बुलक्ष्मी, पंडितरविशङ्करः,उस्तादजाकिरहुस्सैनश्च आदयः कर्नाटकीये त्यागराज इत्यादयः संगीतकाराः।

अन्वितिः ३. भारतीयशास्त्रीयनृत्यम्। **श्रेयोऽङ्कः १**

- भारतीयशास्त्रीयनृत्यरूपाणां परिचयः।
- **भरतनाट्यम्** : उत्पत्तिः प्रविधिः अभिव्यक्तिश्च ; अभिनयस्य (मुखभावः) मुद्राणां च (हस्तस्य इङ्गिताः) महत्त्वम्।
- **कथकम्** : कथाकथननृत्यरूपं, पादकर्म (तत्कार), वृत्तानि (चक्कर), अभिव्यक्तिश्च।
- **ओडिस्सी, कुचिपुडी, मणिपुरी, कथकली च** : प्रत्येकनृत्यशैल्याः संक्षिप्तपरिचयः प्रादेशिकमहत्त्वं च।

अन्वितिः ४. भारतीयशास्त्रीयकलानां दर्शनं सिद्धान्तश्च। **श्रेयोऽङ्कः १**

- सौन्दर्य-अवधारणाः (Aesthetic Concepts)
- दार्शनिक-अवधारणाः (Philosophical Concepts)
- रसः भावाश्च।
- भरतमुनिकृतस्य नाट्यशास्त्रस्य अध्यायानुरूपः परिचयः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. M. Kapoor, *भारतीयसंगीतम् : A Social and Cultural History*।
2. K. R. S. Vishwanathan, *Hindustani Music: A Tradition in Transition*।

सहायकाः ग्रन्थाः (Additional Readings)

1. पाध्ये, शांता, (1989), *अभिनय और रस सिद्धांत*, मुंबई : लोकप्रिय प्रकाशन।
2. द्विवेदी, जानकीवल्लभ, (1995), *भारतीय संगीत का इतिहास*, प्रयागराज : हिन्दी साहित्य सम्मेलन।
3. मिश्र, रामबाबू, (2002), *भारतीय शास्त्रीय नृत्य: परंपरा और विकास*, वाराणसी : चौखम्बा विद्याभवन।
4. कोकास, एम., (2006), *भारतीय कला के मूल तत्व*, नई दिल्ली : नेशनल बुक ट्रस्ट।
5. शर्मा, रमाकान्त, (2010), *नाट्यशास्त्र: एक समीक्षात्मक अध्ययन*, दिल्ली : मोतीलाल बनारसीदास।

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.5: संस्कृते अनूदितं साहित्यम् अनुवादश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. अनूदितसाहित्यस्य सामान्येन प्रत्यभिज्ञापनम्।
2. विविधभाषिक-अनुवादकौशलस्य अवबोधनम्।
3. आधुनिकसाहित्ये अनुवादसाहित्यस्य परिचयप्रदानम्।
4. अनुवादकलायाः वैशिष्ट्यज्ञानप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. संस्कृते अनुवादपरम्परां वर्णयिष्यन्ति।
2. अनुवादसाहित्यनिर्माणे प्रेरणां प्राप्य साहित्यानुवादं करिष्यन्ति।
3. अनूदितसाहित्यस्य सामान्यपरिचयं कथयिष्यन्ति।
4. पत्रकारितायाम् अनुवादकैः कार्यं कर्तुं सिद्धाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.5	संस्कृते अनूदितं साहित्यम् अनुवादश्च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. आधुनिकं संस्कृतसाहित्यम्। **श्रेयोऽङ्कः १**

- आधुनिकसाहित्यस्य आरम्भकालः।
- आधुनिकसमये अनुवादस्य आवश्यकता।
- संस्कृतेऽनूदितसाहित्यं (याज्ञसेनी उडियाभाषातः संस्कृतानुवादः)।
- संस्कृतसाहित्यस्य विकासे अनुवादस्य भूमिका।

अन्वितिः २. साहित्यस्य भाषानुवादः। **श्रेयोऽङ्कः १**

- भाषानुवादे समस्या समाधानञ्च।
- भाषानुवादे नियमाः।
- भाषानुवादे भावाभिव्यक्तिः।

- आधुनिकसाहित्यानुवादे अनुवादकस्य योग्यता।

अन्वितिः ३. पत्रकारितायाम् अनुवादः। **श्रेयोऽङ्कः १**

- जागतिक-राष्ट्रिय-प्रादेशिकवृत्तान्तानाम् अनुवादः।
- सास्कृतिक-क्रीडादिविषयाणाम् अनुवादः।
- कार्यालयेषु सूचनानाम् अनुवादः।
- आधुनिकसाहित्यानुवादे व्याकरणस्य भूमिका।
- अनुवादे तुलनात्मकप्रक्रिया।

अन्वितिः ४. प्रायोगिकाभ्यासः। **श्रेयोऽङ्कः १**

- संस्कृतभाषाया हिन्दीभाषायां हिन्दीतः संस्कृतभाषायां च अनुवादः।
- आङ्ग्लभाषातः संस्कृतभाषायाम् अनुवादः।
- संस्कृतभाषाया आङ्ग्लभाषायाम् अनुवादः।
- संस्कृतभाषाया प्रान्तीयभाषासु प्रान्तीयभाषाया संस्कृतभाषायां च अनुवादः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. नोटियाल, चक्रधर, (1988), *बृहदनुवादचन्द्रिका*, दिल्ली : मोतीलाल बनारसीदास।
2. द्विवेदी, कपिलदेव, (2016), *भाषाविज्ञानम्*, वाराणसी : विश्वविद्यालयीय प्रकाशनम्।
3. सिहाग, नरेश (सम्पा.), *साहित्य और अनुवाद प्रक्रिया*, भिवानी : गीता प्रकाशन।
4. टण्डन्, पूर्णचन्द्र, *अनुवादविमर्श*, दिल्ली : नई किताब प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. प्रमीला, के. पी., *अनुवाद के व्यावहारिक आयाम*, नई दिल्ली : नई किताब प्रकाशन।
2. मेहेर, छबीलकुमार, *अनुवादप्रक्रिया एवं प्रयोग*, नई दिल्ली : नई किताब प्रकाशन।
3. मेहेर, छबीलकुमार, *भाषाप्रयुक्ति एवं अनुवाद*, नई दिल्ली : नई किताब प्रकाशन।

काठिन्यस्तरः
100-199

द्वितीयसत्रार्द्धः (Semester - 2)

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.6: शतककाव्येषु नीतिशतकम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. संस्कृतसाहित्ये शतककाव्यपरम्परायाः परिचयप्रदानम्।
2. नीतिशतकस्य वैशिष्ट्यावबोधनम्।
3. दुष्टसज्जनयोः स्वरूपपरिज्ञानम्।
4. नैतिकमूल्यस्य अवबोधनम्।

पाठ्यक्रमस्य परिणामः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. संस्कृतसाहित्ये शतककाव्यपरम्परायाः परिचयं वर्णयितुं प्रभविष्यन्ति।
2. उत्तमस्वभावस्य विषये वर्णयिष्यन्ति।
3. दुष्टसज्जनयोर्भेदान् विभेत्स्यन्ति।
4. सज्जनसंगतेः प्रेरणां प्रसारयिष्यन्ति।
5. परोपकारिणां स्वरूपं वर्णयितुं शक्ष्यन्ति।
6. दैव- कर्मपद्धत्योः माहात्म्यं व्याख्यातुं शक्ताः भविष्यन्ति।
7. सामान्यजनानाम् उपयोगाय नीतिशतकस्य उपादेयताविषये स्वयं प्रबुद्धाः भविष्यन्ति, स्वकुटुम्बे स्वजीवने सामाजिकजीवने च अपेक्षितं गुणात्मकं परिवर्तनम् आनेष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.6	शतककाव्येषु नीतिशतकम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. संस्कृतसाहित्ये शतककाव्यपरम्परा। **श्रेयोऽङ्कः १**

- शतककाव्यानां परिचयः।
- नीतिशतकस्य वैशिष्ट्यम्।
- भर्तृहरेः कवित्वम्।
- समाजे नीतेः उपयोगित्वम्।
- मंगलाचरणम्।

- मूर्ख-पद्धतिः (२-११ श्लोकाः)

अन्वितिः २. **श्रेयोऽङ्कः १**

- विद्वत्पद्धतिः (१२-२१ श्लोकाः)
- स्वाभिमान-पद्धतिः (२२-३१ श्लोकाः)
- अर्थ-पद्धतिः (३२-४१ श्लोकाः)

अन्वितिः ३. **श्रेयोऽङ्कः १**

- दुर्जन-पद्धतिः (४२-५१ श्लोकाः)
- सज्जन-पद्धतिः (५२-६१ श्लोकाः)
- परोपकार पद्धतिः (६२-७१ श्लोकाः)

अन्वितिः ४. **श्रेयोऽङ्कः १**

- धैर्य-पद्धतिः (७२-८१ श्लोकाः)
- दैव-पद्धतिः (८२-९१ श्लोकाः)
- कर्म-पद्धतिः (९२-१०० श्लोकाः)

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. भर्तृहरिः, (2005), *नीतिशतकम्*, वाराणसी : चौखम्बा संस्कृत अकादमी।
2. पु. गोपीनाथः, *भर्तृहरिशतकत्रयम्*, नवदेहली : केन्द्रीय संस्कृत विश्वविद्यालयः।
3. भर्तृहरिः, (सम्पादक - झा, श्री तारिणीश) *नीतिशतकम्*, इलाहाबाद : रामनारायणलाल विजयकुमार।

सहायकाः ग्रन्थाः (Additional Readings)

1. डा. ए. बी. कीथ, डा. मंगलदेव शास्त्री, (1967), *संस्कृत साहित्य का इतिहास*, दिल्ली : मोतीलाल बनारसीदास।
2. Krishnamacharier, (1974), *History of Classical Sanskrit Literature*, वाराणसी : Motilal Banarsidass.
3. आचार्य बलदेव उपाध्याय, (2001), *संस्कृत साहित्य का इतिहास*, वाराणसी : शारदा निकेतन।
4. कपिलदेव द्विवेदी, (2007), *संस्कृत साहित्य का समीक्षात्मक इतिहास*, वाराणसी : विश्वविद्यालय प्रकाशन।

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.7: मेघदूतवर्णितानि भौगोलिकक्षेत्राणि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. मेघदूतकाव्यस्य विस्तृतपरिचयः।
2. रामगिरितः अलकापुरीपर्यन्तं मार्गस्य काव्यात्मकपरिचयः।
3. विप्रलम्भशृङ्गारस्य अवबोधनम्।
4. कामार्तानां मनःस्थितेः अवबोधनम्।
5. संस्कृतकाव्यवाङ्मये निहितानां विज्ञानतत्त्वानाम् अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. रामगिरेः आम्रकूटस्य रेवानद्याः दशार्णदेशस्य च सामान्यपरिचयं वक्ष्यन्ति।
2. मेघनिर्माणप्रक्रिया तस्मिन् दूतत्त्वारोपणस्य काव्यात्मकपरिचयं वर्णयिष्यन्ति।
3. उज्जयिन्याः वैभवस्य सौन्दर्यस्य च परिचयं कारयिष्यन्ति।
4. गम्भीरानद्याः, सरस्वतीनद्याः, गङ्गानद्याः, चम्बलनद्याश्च सौन्दर्यदर्शनं करिष्यन्ति।
5. उज्जयिनीतः अलकापुरीपर्यन्तं मार्गस्य स्वरूपं प्रतिपादयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.7	मेघदूतवर्णितानि भौगोलिकक्षेत्राणि	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. भारतीयकाव्यपरम्परा। **श्रेयोऽङ्कः १**

- खण्डकाव्यस्य परिचयः।
- कालिदासस्य महाकवित्वम्।
- मेघदूतस्य उपजीव्यम्।
- मेघदूते रसालङ्कारयोः समन्वितिः।

अन्वितिः २. यक्षस्थितिः मेघदर्शनञ्च। **श्रेयोऽङ्कः १**

- यक्षशापवृत्तान्तः।
- मेघस्थितिः, मेघनिर्माणप्रक्रिया, कामार्तस्य प्रकृतिकृपणत्वम्।

- मेघस्य अतिथिसत्कारः, सन्देशप्रापणाय याचना, मेघपर्वतयोः मैत्री।
- मालक्षेत्रम्, आम्रकूटपर्वतः, रेवादर्शनं च।

अन्वितिः ३. मेघदूते भारतस्य भौगोलिकक्षेत्रवर्णनम्। **श्रेयोऽङ्कः १**

- दशार्णदेशः, विदिशानगरी, वेत्रवतीनदी च।
- अवन्तीदेशे उज्जयिनी, उज्जयिन्याः आपणम्, उज्जयिन्याः इतिहासः च।
- महाकालदर्शनम्, महाकालमन्दिरे सन्ध्यानृत्यं पूजनविधानञ्च।
- गम्भीरानदी, देवगिरिः, चर्मण्वती नदी च।

अन्वितिः ४. मेघदूते भारतस्य भौगोलिकक्षेत्रवर्णनम्। **श्रेयोऽङ्कः १**

- ब्रह्मावर्ते कुरुक्षेत्रं, सरस्वतीनदी, गङ्गानदी, यमुनानदी च।
- हिमालयवर्णनं, हिमालये शिवपूजनं किन्नरगानञ्च।
- क्रौञ्चपर्वतदर्शनं, कैलासपर्वतदर्शनं, कैलासपर्वते देवाङ्गनाः च।
- अलकापुर्याः प्रथमदर्शनं, मेघमार्गसौन्दर्यञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. आचार्यशेषराजशर्मा रेग्मी, (2019), *मेघदूतम् (पूर्वमेघः)*, वाराणसी : चौखम्बा विद्याभवन।

सहायकाः ग्रन्थाः(Additional Readings)

1. डा. ए. बी. कीथ, डा. मंगलदेव शास्त्री, (1967), *संस्कृत साहित्य का इतिहास*, दिल्ली : मोतीलाल बनारसीदास।
2. उमाशंकर ऋषि, (2000), *संस्कृत साहित्य का इतिहास*, वाराणसी : चौखम्भा भारती अकादमी।
3. आचार्य बलदेव उपाध्याय, (2001), *संस्कृत साहित्य का इतिहास*, वाराणसी : शारदा निकेतन।

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.8: प्रमुखाणि छन्दांसि कविशिक्षा च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. छन्दोमञ्जरीग्रन्थस्य सामान्यपरिचयप्रदानम्।
2. छन्दश्शास्त्रस्य प्राप्यमाणानां प्रयोजनानां ज्ञानसम्पादनम्।
3. छन्दश्शास्त्रानुगुणं श्लोकलेखनसामर्थ्यम्।
4. कविशिक्षायाः ज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयज्ञानपरम्परायां काव्यशास्त्रसौन्दर्यदर्शनानां नानाविधवृत्त-कविसमयादीनां विषयाणां वर्णनं करिष्यन्ति।
2. अनुष्टुब्बृहती-इत्यादिनिर्दिष्टानां छन्दसां परिचयं वक्ष्यन्ति।
3. साहित्यस्य रचनार्थम् उपयोगिनीं कविशिक्षां प्रतिपादयिष्यन्ति।
4. पद्यरचनां कर्तुं प्रयतिष्यन्ते।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.8	**प्रमुखाणि छन्दांसि कविशिक्षा च**	**04**	**0**	**0**	**04**

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. छन्दःशास्त्रपरम्परा। **श्रेयोऽङ्कः १**

- छन्दःशास्त्रस्य महत्त्वम्।
- छन्दोमञ्जरी इति ग्रन्थस्य वैशिष्ट्यम्।
- छन्दोग्रन्थकर्तुः गङ्गादासस्य योगदानम्।
- प्राकृतसाहित्यम्।
- आर्या-गीति-गण-सम-अर्धसम-विषमवृत्तानां स्थानं महत्त्वं च।
- गुरुलघुनिर्देशः प्रसिद्धानि छन्दांसि च।

अन्वितिः २. अष्टाक्षरादिच्छन्दांसि। **श्रेयोऽङ्कः १**

- अष्टाक्षरस्य अनुष्टुभ्छन्दसः लक्षणं तन्महत्त्वं च, विद्युन्मालाख्यस्य अनुष्टुभ्भेदस्य लक्षणम्, उदाहरणं च।
- दशाक्षरस्य मात्रावृत्तस्य लक्षणोदाहरणे।

- एकादशाक्षराणाम् इन्द्रवज्रा-उपेन्द्रवज्रा-उपजाति- शालिनी-दोधकवृत्तानां लक्षणोदाहरणानि।
- द्वादशाक्षराणां वंशस्थवृत्त-भुजङ्गप्रयात-तोटक-द्रुतविलम्बितवृत्तानां लक्षणोदाहरणानि।

अन्वितिः ३. त्रयोदशाक्षरादिच्छन्दांसि। **श्रेयोऽङ्कः १**

- त्रयोदशाक्षराणां प्रहर्षिणी-मत्तमयूर-मञ्जुभाषिणी-वृत्तानां लक्षणोदाहरणानि।
- चतुर्दशाक्षरस्य वसन्ततिलकावृत्तस्य लक्षणोदाहरणे।
- पञ्चदशाक्षरस्य मालिनीवृत्तस्य लक्षणोदाहरणे।
- षोडशाक्षरस्य पञ्चचामरवृत्तस्य लक्षणोदाहरणे।
- सप्तदशाक्षराणां शिखरिणी-मन्दाक्रन्ता-पृथ्वीवृत्तानां लक्षणोदाहरणानि।
- नवदशाक्षरस्य शार्दूलविक्रीडितवृत्तस्य लक्षणोदाहरणे।
- एकविंशाक्षरस्य स्रग्धरावृत्तस्य लक्षणोदाहरणे।

अन्वितिः ४. कविशिक्षा। **श्रेयोऽङ्कः १**

- शास्त्रसङ्ग्रहः।
- कविचर्या राजचर्या च।
- शब्दार्थहरणोपायाः।
- कविसमयः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीगङ्गादासप्रणीता, *छन्दोमञ्जरी* (व्याख्या: डा. ब्रह्मानन्द त्रिपाठी), वाराणसी : चौखम्बा सुरभारती प्रकाशन।
2. सं. डा. गंगासागर राय, *हिन्दी काव्यमीमांसा*, वाराणसी : चौखम्बा विद्याभवन।

सहायकाः ग्रन्थाः (Additional Readings)

1. केदारभट्टः, (1962), *वृत्तरत्नाकरम्*, वाराणसी : चौखम्बा संस्कृत सीरीज़ आफिस।
2. पं. मधुसूदन ओझा, (1991), *छन्दःसमीक्षा (समीक्षाग्रन्थः)* (सं. श्री सुरजनदासस्वामी), जयपुर : राजस्थान संस्कृत अकादेमी।
3. अभिराजराजेन्द्रमिश्रः, (1999), *छन्दोऽभिराजीयम् (छन्दःशास्त्रम्)*, इलाहाबाद : वैजयन्त प्रकाशन।
4. आचार्य रामकिशोरमिश्रा, (2058 वि.सं.), *संस्कृत छन्दो का उद्भव तथा विकास*, मेरठ : ज्ञानप्रकाशन, सुभाष बाजार।
5. पिंगलः, *छन्दःशास्त्रम्*, वाराणसी : चौखम्बा संस्कृत-सुरभारती प्रकाशनम्।

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.9: संस्कृतगद्यसाहित्यस्य परिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. संस्कृतगद्यसाहित्यस्य सामान्यपरिचयप्रदानम्।
2. गद्यसाहित्येन प्राप्यमाणानां प्रयोजनानां ज्ञानसम्पादनम्।
3. गद्यसाहित्ये विद्यमानानां प्रमुखग्रन्थानां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. विविधगद्यसाहित्यस्य परिचयात्मकवर्णनं करिष्यन्ति।
2. गद्यसाहित्ये विद्यमानवैशिष्ट्यस्य गुणानाञ्च परिचयप्रदानं करिष्यन्ति।
3. प्राचीनसंस्कृतवाङ्मये गद्यकाव्यस्वरूपं भेदान् च वर्णयिष्यन्ति।
4. शुकनासोपदेश-शिवराजविजय-इत्यादिग्रन्थान् निरूपयिष्यन्ति।
5. प्रमुखगद्यसाहित्यरचनाकाराणां विषये वर्णयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.9	संस्कृतगद्यसाहित्यस्य परिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. शुकनासोपदेशः। **श्रेयोऽङ्कः १**

- शुकनासोपदेशस्य परिचयः।
- शुकनासोपदेशवर्णितः समाजः।
- शुकनासोपदेशवर्णितं राजनैतिकचिन्तनम्।

अन्वितिः २. शिवराजविजयं (निःश्वासः - १) **श्रेयोऽङ्कः १**

- शिवराजविजयस्य काव्योत्कृष्टता कथानकं, क्रियाकालः च। (Poetic excellence, plot, Timing of Action)

अन्वितिः ३. संस्कृतगद्यसाहित्येतिहासः। **श्रेयोऽङ्कः १**

- महत्त्वपूर्णगद्यकाव्यानाम् उत्पत्तिः विकासश्च (सुबन्धुः बाणः दण्डी अम्बिकादत्तव्यासादीनां विशेषसन्दर्भे)

अन्वितिः ४. संस्कृतगद्यसाहित्यस्य सर्वेक्षणम्। **श्रेयोऽङ्कः १**

- संस्कृतगद्यसाहित्यस्य सर्वेक्षणम् - अधोदत्तगद्यकाव्यानां विशेषसन्दर्भे।
- पंचतन्त्रं हितोपदेशः वेतालपञ्चविंशतिका सिंहासनद्वात्रिंशिका पुरुषपरिक्षा च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. *कादम्बरी*, देहली : मेहरचन्दलक्ष्मणदासः।
2. अम्बिकादत्तव्यासरचितः, *शिवराजविजयम्* (व्याख्या – रमाशंकरश्रीः), वाराणसी : चौखम्भा सुरभारती प्रकाशनम्।
3. Keith, A. B. *History of Sanskrit Literature* (also Hindi translation). Delhi : Motilal Banarsidass (MLBD).

सहायकाः ग्रन्थाः (Additional Readings)

1. पाण्डेय, रामनाथ, (1990), *संस्कृत गद्य के प्रमुख रचनाकार*, वाराणसी : सरस्वती भवन ग्रंथमाला।
2. झा, गोविन्द, (1998), *संस्कृत गद्य साहित्य में नीतिकाव्य परंपरा*, पटना : विद्याभवन प्रकाशन।
3. भट्ट, जी. एन., (2001), *संस्कृत गद्य साहित्य का इतिहास*, वाराणसी : चौखम्बा संस्कृत भवन।
4. शास्त्री, सत्यव्रत, (2008), *संस्कृत साहित्य का संक्षिप्त इतिहास*, दिल्ली : मोतीलाल बनारसीदास।
5. मिश्र, प्रभाकर, (2015), *गद्यकाव्यम्, एक अध्ययन*, प्रयागराज : भारतीय साहित्य संस्थान।

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.10: अलङ्कारशास्त्रस्य परिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. अलङ्कारशास्त्रस्य सामान्यपरिचयप्रदानम्।
2. अलङ्कारशास्त्रेण प्राप्यमाणानां प्रयोजनानां ज्ञानसम्पादनम्।
3. अलङ्कारशास्त्रे विद्यमानानां प्रमुखग्रन्थानां परिचयप्रदानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. विविध-अलङ्कारशास्त्राणां परिचयं वक्ष्यन्ति।
2. अलङ्कारशास्त्रे विद्यमानवैशिष्ट्यस्य गुणानाञ्च परिचयस्य प्रदाने समर्थाः भविष्यन्ति।
3. प्राचीनसंस्कृतवाङ्मये अलङ्कारशास्त्रभेदान् च निरूपयिष्यन्ति।
4. ध्वनि-रस-औचित्य-वक्रोक्ति-रीति-इत्यादि-अलङ्काराणां प्रतिपादने समर्थाः भविष्यन्ति।
5. प्रमुख-अलङ्काररचनायाः मौलिकतां वर्णयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.10	अलङ्कारशास्त्रस्य परिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. अलंकारशास्त्रस्य विभिन्नाः सिद्धान्ताः। **श्रेयोऽङ्कः १**

- ध्वनिसिद्धान्तस्य परिचयः।
- रससिद्धान्तस्य परिचयः।

अन्वितिः २. मम्मटरचितकाव्यप्रकाशः। **श्रेयोऽङ्कः १**

- लेखकस्य परिचयः।
- ग्रन्थस्य परिचयः।
- दशोल्लासानां विशिष्टः परिचयः।

अन्वितिः ३. काव्यप्रकाशः प्रथमोल्लासः। **श्रेयोऽङ्कः १**

- कविसृष्टिः - ब्रह्मसृष्टिः।
- काव्यप्रयोजनम्।

- काव्यहेतुः।
- काव्यभेदाः।

अन्वितिः ४. काव्यप्रकाशः द्वितीयोल्लासः। **श्रेयोऽङ्कः १**

- संकेतवादः।
- षड्विधलक्षणा।
- लक्षणामूलव्यञ्जना।
- अभिधामूलव्यञ्जना।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. मम्मटः, *काव्यप्रकाशः*, धारवाडम् : प्रसरंग कर्नाटक विश्वविद्यालयः।
2. मम्मटः, *काव्यप्रकाशः*, वाराणसी : चौखम्भा संस्कृतमालाकार्यालयः।
3. डॉ. सत्यव्रत सिंह, *काव्यप्रकाशः*, देहली : चौखम्भा संस्कृत प्रतिष्ठानम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. आनन्दवर्धनः, (1990), *ध्वन्यालोकः* (सम्पा. पं. रमाशंकर त्रिपाठी), वाराणसी : चौखम्बा विद्याभवन।
2. भरतमुनिः, (1996), *नाट्यशास्त्रम्* (एड. मण्मथनाथ द्विवेदी), वाराणसी : चौखम्बा संस्कृत सीरीज कार्यालय।

द्वितीयवर्षः
(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः 200-299	तृतीयसत्रार्द्धः (Semester - 3)	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.1: काव्यलक्षणानुबन्धप्रयोजनानि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. साहित्यशास्त्रे काव्यलक्षणपरिज्ञानम्।
2. साहित्य शास्त्रे अनुबन्धानां परिज्ञानम्।
3. भारतीयज्ञानपरम्परायां काव्यशास्त्रे च काव्यप्रयोजनविषये ज्ञानार्जनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. साहित्यशास्त्रे प्रोक्तानि काव्यलक्षणानि सूक्ष्मतया प्रतिपादयिष्यन्ति।
2. भारतीयज्ञानपरम्परायां काव्यशास्त्रे अलङ्कारप्रयोजनविषये वर्णयिष्यन्ति।
3. काव्यशास्त्रेऽनुबन्धचतुष्टयविषये वक्तुं शक्ष्यन्ति।
4. आलङ्कारिकनये मम्मटाचार्यानुसारेण विश्वनाथानुसारेण पण्डितराजजगन्नाथानुसारेण च काव्यप्रयोजनं निरूपयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/ Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	काव्यलक्षणानुबन्ध-प्रयोजनानि	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. आलङ्कारिकनये काव्यस्वरूपम्। **श्रेयोऽङ्कः १**

- भामहप्रभृति-आलङ्कारिकाणां मतानुसारेण काव्यलक्षणम्।
- अनुबन्धचतुष्टयम्।
- काव्यप्रयोजनम्।
- प्रमुखाणाम् आलङ्कारिकानां मतानुसारेण काव्यप्रयोजनम्।

अन्वितिः २. मम्मटाचार्यानुसारेण काव्यप्रयोजनम्। **श्रेयोऽङ्कः १**

